# चित्रकाव्यम्

# CHITHRAKĀVYAM

## PART II




श्री. उ. वे. शुण्डपालयम् तिरुमलै
रामभद्राचारियर्

SRI. U.VE. SUNDAPALAYAM TIRUMALAI
RAMABADRACHARIAR

# चित्रकाव्ये द्वितीयः परिच्छेदः

कविना रामभद्रेण काव्ये चित्रमये कृते ।
द्वितीयस्तु परिच्छेदो बध्यते बन्धरूपतः ॥

## तत्र प्रथमं पञ्चायुध प्रकरणम्
## सुदर्शन बन्धः

सदा सत्सं सदासक्तं सर्वरक्षारतं समं ।
सशान्ति दन्तिपं सर्व - सचित् भव्यं भजे समम् ॥ 1 ॥




सदेति । सत्संसत् - नित्यसूरि गोष्ठी तस्यां सर्वदा आसक्तं । सर्वरक्षारतं - सर्वजगद्रक्षण जागरूकं । समं सर्वभूतसमं - वैषत्यरहितमित्यर्थः । सशान्ति दन्तिपं - नक्रोपद्रवात् देहेन्द्रियादि वैक्लव्य विशिष्ट गजेन्द्ररक्षकं । सर्व सचित् भव्यं - सचितः ज्ञानिनः, सर्वज्ञानिनां मङ्गळरूपं । समं - लक्ष्मीसहितं भजे ।

(Read all eight radials from the centre स in clock wise direction)





# शंख बन्धः

श्रीनन्दनद नक्रारे ह्यसुराधिद नन्दन ।
श्रीनन्दन दधिक्षीर-चोर पाहिनतं हरे ॥ 2 ॥

श्रीनन्दनेति । श्रीनन्दनः मन्मथः तं ददातीति तद् । स्त्रीपुं विभागमन्तरेण स्वसौन्दर्येण सर्वमोहन इत्यर्थः । नक्रारे असुराधिद (असुर + आधि + द) । दधिक्षीरचोर-स्पष्टं ।

नन्दन - सर्वानन्दकर । श्रीनन्दनः श्रियः नायकत्वेन आनन्दकरः श्रियः पतेरित्यर्थः हे हरे नतं मां पाहि ।



# गदा बन्धः

काळिका लतिका पाद पेशाजाधिदघोरहा ।

हारघोदधिजाशापेदपाकातिलकाळिका ॥ 3 ॥




काळिकेति । अयं श्लोकः प्रथमपरिच्छेद त्रयोविंश-प्रकरणे अर्थाकनुलोमप्रतिलोमोदहरण श्लोकतया व्याख्यातः । (श्लो सं ३८४) तत् च एवं। काळिकेति - पूर्वचेकपदं काळ्येब काळिका - उमा, सैव लतिका -लता, तस्याः पादपः ***** रुद्रः, अजः ब्रह्मा, तयोः अधिद - पीडां ददन्ति, घोराः -असुरराक्षस - श्रेष्टाः, तान् हन्तीति तथोक्ता । हारया हारस्य यः घटना संबन्ध इत्यर्थः सः यस्यामिति तथोक्ता । मुक्ताहारवतीति भावः । आशापेदपाका - आशाः दिशः पान्तीति आशापाः दिक्पालकाः तेषां श्री लक्ष्मीं तत् तत् ऐश्वर्यमिति अर्थ । तद् ददातीति तद्दः * * * * पाकः अर्भकः यस्यास्सा, तिलकाळिका - सतिलक ललाटतला । * * * * लक्ष्मीः पात्विति शेषः ।

लक्ष्म्यां कमल केसरे । इति श्लोक - द्वयापि नानार्थ रत्नमाला द्रष्टव्या ।

# खड्ग बन्धः

सा रमा पातु मा देवी धूतकोपा शुभानना ।

नारायणमनः कोप - निवृत्ति निजमानसा ॥ 4 ॥

सादरा दासपर्येषु सुचंपक सदृङ्नसा ।

सागसं दासमगति-माद्रा गोपाय सक्षमा ॥ 5 ॥

सेति । स्पष्टर्थः ।



# शार्ङ्ग बन्धः

तं नु रासपमेडेहं हंडेमेऽपसरानुतं ।

तं रमापयमार्यासा सार्या मायपमारतं ॥ 6 ॥




तंनु इति । (पदच्छेदः तं नु रासपं आ ईडे अहं हंडे अमे अपसर अनुतं तं रमा आप यं आर्या सा सार्या मा अयपमारतं) आर्या-सर्वप्रज्ञा रमा-रमाशब्द वाच्चा मा-लक्ष्मीः, सार्या-भूमिनीळासहिता सती यं आप, पतित्वेनेति शेषं । अयपमारतं - अयश् शुभावह विधिः तं पातीति तत्पा, या मा तस्यां रतं । रासपं - रासमण्डले प्रसन्नं । अनुतं एन ब्रह्मणानुतं तं, आ-संयक् ईडे - भजे । हण्डे-हे अमे-अविद्ये अपसर-मां विहाय याहि । 'पत्रिष्वार्ते प्रसन्ने च' मा स्त्री माने मृतौ वेला मेघा श्री मघु मातृषु इति नानार्थ रत्न माला ।

# द्वितीयं चक्रबन्ध प्रकरणम्

## चतुरर चक्र बन्धः

नमामि दीनपालं त्वा नतदेवनगापमः ।

पतिन्नदीनवासं त्वामृते कोवनसुक्षमः ॥ 7 ॥

नमामीति । हे नतदेवनग ! आश्रित कल्प वृक्ष ! विष्णो इत्यर्थः । दीनपालं त्वा नमामि । नदीनवासं - क्षीराब्धिवासिनं त्वां ऋते-त्वां विना । अपमः -लक्ष्मी शून्यः को वा, अवन सुक्षमः रक्षण समर्थः । लक्ष्मीपतित्वात् त्वमेव रक्षकः नान्य । ह्रीश्चते लक्ष्मीश्च पत्न्यौ इत्यादि श्रुतिभिः श्रियः पतेरेव हि पुरुषोत्तमत्वं उक्तं इति भावः ।

Start from the centre न and read the four spokes. Then read along the circumference.



# अन्योयञ्चतुरर चक्रबन्धः

मा रमा तेन्दिरा नामाऽमानाराध्यपदाऽसमा ।
मा सदा प्रणतं भीमाऽमाभीतं पातु मा रमा ॥ 8 ॥






मा रमेति । इन्दिरा नामा-इन्दिरेत्याख्या विशिष्टा । अमानैः निरहंकारैः आराध्य पदा । असमा - निस्तुला । रमा शब्द वाच्या - मा लक्ष्मीः । भीमा भयंकरी या अमा - अविद्या तत् भीतं । प्रणतं - शरणागतं, मा-मां सदा पातु । मा शब्दस्य ज्ञान वाचकत्वात् आमा शब्दः अविद्यापरः ।

Start from the centre and complete quarter by quarter circle.

# द्विशृङ्गाटक चक्र बन्धः

दक्षौ ते चरणौ कान्तौ देवि चक्रि दयाद्र ते ।

तेजसा रविनीकाशौ वंदे वरचयन्दद ॥ 9 ॥




दक्षौ इति । चक्रि - दयार्थं भगवतः अस्मदपराध - विस्मृति जनक कारुण्य भनार्थं आद्रते - चुरुषकारत्वेन अस्माभिः आश्रिते-हे देवि लक्ष्मि । तेजसा रविनीकाशौ कान्तौ - मनाज्ञौ । दक्षौ रक्षणसमर्थन ते चरणौ वन्दे । वरचयं - अस्मदभीष्टं सर्व दद ।